https://www.cgboardonline.com

# नया पाठ्यक्रम

कुल प्रश्नों की संख्या : 27 ]

[ कुल मुद्रित पृष्ठों की संख्या : 11

## O-212030–C

## विषय : संस्कृत

https://www.cgboardonline.com

https://www.cgboardonline.com

समय : **3 घण्टे** ]

[ पूर्णांक : **80**

*निर्देशा:* : (*i*) **सर्वा:** प्रश्ना: समाधेया:।

(*ii*) सुन्दरं सुस्पष्टञ्च लिखत।

(*iii*) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखितव्यानि।

**प्रश्न-1** 'स्वप्नवासवदत्तम्' इति नाटकस्य रचयिता क: ? [1]

**प्रश्न-2** 'बुद्धचरितम्' इति ग्रन्थे कति सर्गा: ? [1]

**प्रश्न-3** 'चाणक्यस्य भिन्ननाम ——— ।' अत्र रिक्तस्थानं पूरयत। [1]

**प्रश्न-4** 'नैकेन' पदे का सन्धि: अस्ति ? [1]

**प्रश्न-5** 'क:+अत्र' पदयो: सन्धि कृत्वा लिखत। [1]

**प्रश्न-6** 'कठोरभाषणै: ' इति पदस्य समासविग्रहं कुरुत। [1]

**प्रश्न-7** 'गता' इति पदस्य प्रकृति-प्रत्ययं च पृथक् कुरुत। [½+½=1]



https://www.cgboardonline.com

https://www.cgboardonline.com



**प्रश्न-8** "भरतो वा भवेद् राजा वयं वा ननु तत् समम्।" इति कस्य कथनमस्ति? [1]

**प्रश्न-9** रिक्तस्थानं पूरयत—

वैवस्वतो मनुर्नाम —— मनीषिणाम्। [1]

**प्रश्न-10** 'मुमुर्षुः' इति पदस्य हिन्द्यर्थं लिखत। [1]

**प्रश्न-11** प्रकरणस्य द्वे विशेषते लिखत। [1+1=2]

**प्रश्न-12** नाटके 'प्रस्तावना' विषये संक्षिप्त टिप्पणीं लिखत। [2]

**प्रश्न-13** कोष्ठकगत पदेषु उचित विभक्तिं प्रयुज्य वाक्ये पूरयत— [1+1=2]

(क) पिता —— (पुत्र) सह गच्छति।

(ख) —— (नगर) बहिः विद्यालयमस्ति।

**प्रश्न-14** रेखांकित पदे शुद्धीकृत्य वाक्ये पुनः लिखत— [1+1=2]

(क) वयं चलचित्र <u>पश्यति</u>।

(ख) अद्य बुधवासरः अस्ति, श्वः गुरुवासरः <u>आसीत्</u>।

**प्रश्न-15** अधोलिखितवाक्यान् रेखांकितपदामाधृत्य उचितान्वितिः कृत्वा लिखत— [1×3=3]

(क) अग्निः <u>प्रचण्डः / प्रचण्डा</u> भवति।

(ख) त्वं पाठं <u>पठामि / पठसि</u>।

(ग) <u>एषः / एषा</u> बालिका अस्ति।

**प्रश्न-16** भतृहरेः परिचयं लिखत। (30 शब्देषु) [3]

https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com


**प्रश्न-17** लघुभगिनीं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत— [½×10=5]

प्रिय --(i)-- श्रेया

सस्नेहं --(ii)--।

--(iii)-- अहं तव पत्र प्राप्तवान्। --(iv)-- परीक्षा परिणाम --(v)-- अस्ति। --(vi)-- भवता न्यूनाः अङ्काः --(vii)-- इति सखेदं मया अधीतम्। --(viii)-- प्रतिदिनं प्रातःकाले उत्थाय संस्कृतस्य अभ्यासं --(ix)--। अभ्यासेन एव सर्वाणि --(x)-- सिध्यन्ति।

भवदीया अग्रजा

एकता

| |
|---|
| आशीषः, अनुजा, कुरु, कार्याणि, ह्यः, संस्कृतविषये, त्वं, प्राप्ताः, तव, शोभनः |

*अथवा*

प्राचार्यं प्रति सदवृत्तप्रमाणपत्रार्थं लिखिते पत्रे मञ्जूषादत्त पदैः रिक्तस्थानानि पूरयित्वा पत्र लिखत—

---(i)-----

माननीयाः प्रधानाचार्याः

शा. उ. मा. वि., बस्तर

विषयः - सदवृत्तप्रमाणपत्रार्थं --(ii)---।

---(iii)---,

सविनयं निवेद्यते यत षाण्मासिक्यां परीक्षायाम् अनुपस्थितकारणात् अहं दण्डितः --(iv)--। वस्तुतः तेषु दिनेषु अहं 'कोरोना' रोग ग्रस्तः --(v)-- । मम पिता आजीविकायाः कार्यवशात् नगराद् बहिः आसीत्। गृहे मम माता एव --(vi)-- आसीत्। सा अहर्निशं मम सेवायाम् --(vii)-- आसीत्।

अतोऽहं प्रार्थनापत्रमपि --(viii)-- समर्थोनाऽभवम्। अयं मम प्रथम एव अवसरः आसीत्। आशासे यत् --(ix)-- मम दण्डं क्षमयित्वा मह्यं सदवृत्तप्रमाणपत्रं --(x)--।

भवन्तः

राजीवः

| |
|---|
| एकला, आसम्, अभवम्, महोदयः, अत्रभवन्तः, दास्यन्ति, प्रेषयितुम, संलग्ना, सेवायाम्, प्रार्थनापत्रम् |


https://www.cgboardonline.com
https://www.cgboardonline.com
https://www.cgboardonline.com

https://www.cgboardonline.com

प्रश्न-18 मञ्जूषातः पदानि चित्वा कथां पूरयित्वा लिखत— [½×10=5]

एकदा कश्चित् बालः --(i)-- क्रेतुम् अगच्छत्। सः --(ii)-- महावञ्चकः आसीत्। स न्यूनमेव --(iii)-- । तदा बालकेन कथितम्—भो किमिति मह्यं --(iv)-- न ददासि इति'' तत् --(v)-- सः अवदत्—का हानिः। यावत् अल्पं ते ददामि तावत् ते --(vi)-- सुवहो भविष्यति। बालकोऽपि --(vii)-- हीनमूल्यम् अददात्। ततः स सरोषमाह—किं मेऽल्पं --(viii)-- ददासि इति। बालकोऽवदत् यथा ते --(ix)-- नायासो --(x)-- कथयित्वा चलितः।

| |
|---|
| भवेदिति, गणनायाम्, मूल्यम्, भारः, अतोलयत्, मिष्टान्नम्, श्रुत्वा, कान्दविकः, तस्मै, पूर्णपरिमाणम् |

*अथवा*

मञ्जूषातः पदानि चित्वा कथां पूरयित्वा लिखत—

एकदा --(i)-- आहारार्थी कश्चित् --(ii)-- ग्रामं प्रविष्टः । तत्रत्याः --(iii)-- जम्बुक-दर्शनेन जातरोषाः हन्तुं तं --(iv)-- । सोऽपि प्राण-रक्षणाय --(v)-- रजकगृहं प्रविष्टः तत्र --(vi)-- नीलीभाण्डे च पतितः। अनन्तरं --(vii)-- स्वशरीरं विलोक्य मुदितमनाः शनैः --(viii)-- निष्क्रान्तः। विचित्रवर्णं तम् अपूर्वं सत्त्वं --(ix)-- कुक्कराः अपि भयात् दूरम --(x)-- ।

| |
|---|
| पलायितः, मन्यमानाः, समीपस्थम्, स्थापिते, बहिः, नीलवर्णमनोहरम्, प्रत्यधावन्, कुक्कराः, जम्बुकः, सायंकाले |



https://www.cgboardonline.com
https://www.cgboardonline.com
https://www.cgboardonline.com

https://www.cgboardonline.com



प्रश्न-19 अधोलिखित वाक्यानां संस्कृतभाषया अनुवादं कुरुत— [1×5=5]

(*i*) श्रीकृष्ण को नमस्कार है।

(*ii*) वृक्ष से फल गिरते हैं ।

(*iii*) गणेश को लड्डू अच्छा लगता है।

(*iv*) संस्कृत विश्व की प्राचीनतम भाषा है।

(*v*) दीपावली शरदकाल का प्रधान उत्सव है।

***अथवा***

(*i*) ग्वाला गायों को चराता है।

(*ii*) स्त्रियाँ जन्म से ही चतुर होती हैं।

(*iii*) पिता के साथ नगर जाओ।

(*iv*) वीर शत्रुओं को युद्ध में मारता है।

(*v*) मैं ईश्वर की भक्ति करता हूँ।

प्रश्न-20 अधोलिखित प्रश्नानां उत्तराणि संस्कृतभाषया लिखत— [1×5=5]

(*i*) रामेण त्रीणि पातकानि कानि उक्तानि ?

(*ii*) कविना राजेन्दुः कः कथितः ?

(*iii*) कः कं कठोरभाषणैः तिरस्करोति ?

(*iv*) केषां विद्या एव रूपम् अस्ति ?

(*v*) कस्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः अस्ति ?



https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com



***अथवा***

(*i*) लक्ष्मणः किमर्थं कृतनिश्चयः ?

(*ii*) शिवगणाः कीदृशाः आसन् ?

(*iii*) के सर्वलोकस्य दासाः सन्ति ?

(*iv*) सभायां कीदृशः ब्राह्मणः आगतवान् ?

(*v*) नरकेऽशुचौ के पतन्ति ?

**प्रश्न-21** रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कुरुत— [1×5=

(*i*) <u>शब्दानाम्</u> अन्वाख्यानं व्याकरणम्।

(*ii*) <u>भूतेषु</u> दया एव दैवी सम्पद्।

(*iii*) <u>राजाज्ञा</u> एव पालनीया।

(*iv*) शर्वरी <u>चन्द्रेण</u> भाति।

(*v*) प्रजानामेव <u>भूत्यर्थं</u> स ताभ्यो बलिमग्रहीत्।

***अथवा***

(*i*) <u>इतिहासः</u> पुराणप्रभेदोऽस्ति।

(*ii*) <u>विद्या</u> विनयं ददाति।

(*iii*) <u>खलः</u> दुष्टमाचरति।

(*iv*) कोऽपि <u>रात्रौ</u> न प्रविशति।

(*v*) मे <u>राज्ये</u> मनोरथः नास्ति।

https://www.cgboardonline.com

https://www.cgboardonline.com



https://www.cgboardonline.com

https://www.cgboardonline.com



प्रश्न-22 अधोलिखित वाक्येषु कोष्ठकान्तर्गत्-प्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत— [1×5=5]

(i) तत्र एक: वानर: —— स्म। (प्रति+वस्)

(ii) पुत्रं च बालं —— चिन्तयामास। (सम्+वि+ईक्ष्+ल्यप्)

(iii) ताम्रं सुवर्ण —— शक्नुधा: । (वि+धा+तुमुन्)

(iv) तद्गुणै: कर्णम् —— चापलाय प्रचोदित:। (आ+गम्+ल्यप्)

(v) मातु: परिवादं न —— इच्छामि। (श्रु+तुमुन्)

*अथवा*

(i) न मां —— अर्हसि। (शुच् +तुमुन्)

(ii) अयं मदभक्ति: ——। (दृश् +क्त+टाप्)

(iii) अद्यापि यत्र —— जननी स्वतन्त्रा। (वि+हा+क्त)

(iv) —— हि चिरं श्लेष: कालेन न भविष्यति। (भू+क्त्वा)

(v) पिता आत्मनो जरां —— विचारयामास। (ज्ञा+क्त्वा)

प्रश्न-23 अधोलिखितम् अपठितगद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत— [10]

अस्माकं परित: प्रसृतं वातावरणं कथ्यते। पर्यावरणस्य रक्षा अस्माकं परमं कर्तव्यम् अस्ति। पर्यावरणप्रदूषणेन अस्माकं जीवनम् अपि शनै: शनै: रुग्णं भवति, क्षयं च प्राप्नोति। पर्यावरणस्य रक्षायै अस्माभि: स्वगृहाणाम् प्राङ्गणे विविधा: पुष्पपादपा: रोपणीया: । राजमार्गम् उभयत: छायावृक्षा: रोपणीया:। वृक्षाणाम् विनाश: दण्डनीय: अपराध: घोषयितव्य:। सर्वे प्रदूषणप्रसारपरा: उद्योगा: नगरात् ग्रामात् वा दूरे स्थापनीया:। कर्मस्थलानाम् अवकर: नदीषु न पातनीय:। गृहाणाम् अवकर: गृहेभ्य: दूरे पातनीय:। वाहनानां प्रयोग: न्यून: कर्तव्य: ।गृहस्य सर्वे सदस्या: पृथक् -पृथक् वाहनेन न गन्तव्या:। पर्यावरणस्य रक्षणेन एव अस्माकं रक्षा। यदि जना: पर्यावरणस्य रक्षायै कटिबद्धा: न भविष्यन्ति तर्हि असाध्या: रोगा: वृद्धिं गमिष्यन्ति, प्रकृति च शनै:-शनै: विनश्य मानवजीवनं बाधितं करिष्यति। अत पर्यावरणस्य रक्षा प्राथमिकरूपेण कुर्यात्।

https://www.cgboardonline.com P.T.O.

https://www.cgboardonline.com
https://www.cgboardonline.com

*प्रश्ना:*

I. एकपदेन उत्तरत [1×2=2]

(*i*) कम् उभयत: छायावृक्षा: रोपणीया: ?

(*ii*) कस्य रक्षा अस्माकं परमं कर्तव्यम् अस्ति ?

II. पूर्णवाक्येन उत्तरत— [2×2=4]

(*i*) मार्गमुभयत: अस्माभि: किं करणीयम् ?

(*ii*) दण्डनीय: अपराध: कं घोषयितव्य: ?

III. निर्देशानुसारेण उत्तरत— [1×2=2]

(*i*) 'अधिक:' इति पदस्य अत्र किं पर्यायपदं प्रयुक्तम् ?

(*ii*) 'पुरस्करणीय:' इति पदस्य अत्र किं विलोमपदं प्रयुक्तम् ?

IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। [2]

***अथवा***

भारते प्रतिगृहं तुलसी भवति एव। भक्त्या सा प्रतिदिनं पूज्यते। केषुचित् विशिष्टेषु प्रसङ्गेषु तस्या: विशेष पूजा अपि क्रियते। बहूनां रोगाणाम् इव परिसरमालिन्यस्य निवारणेऽपि सा उपकरोति इति वदन्ति वैज्ञानिका:। तस्या: एतत् वैशिष्ट्यम् एव एषु दिनेषु ताजभवनस्य संरक्षकाणाम् अवधानम् अपि आकृष्टवत् आसीत्। परिसर-मालिन्यकारणात् ताजभवनस्य सौन्दर्यं यत् विनश्यत् अस्ति तस्य निवारणाय तद्भवनसंरक्षकै: चिन्तितं यत् तुलस्या: सहायता स्वीकरणीया इति। अत: इदानीं ताजभवनपरिसरे सहस्रश: तुलसीपादपा: आरोपणीया:। तुलसी आधिक्येन आम्लजनकम् उत्पाद्य हानिकराणाम् अनिलानां प्रभावं न्यूनीकरोति इति तु प्रमाणसिद्धं सत्यम्।

*प्रश्ना:*

I. एकपदेन उत्तरत—

(*i*) तुलसी केषां अनिलानां प्रभावं न्यूनीकरोति ?

(*ii*) कस्या: सहायता स्वीकरणीया ?



https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com



II. पूर्णवाक्येन उत्तरत—

(i) ताजभवनसंरक्षकैः किं चिन्तितम् ?

(ii) वैज्ञानिकाः किं वदन्ति ?

III. निर्देशानुसारेण उत्तरत—

(i) 'न्यूनीकरोति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) 'ध्यानम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

प्रश्न-24 अधोलिखित वाक्येषु रेखांकित पदानां समास-विग्रहाः कुरुत— [1×4=4]

(i) सः <u>नृपसेवकः</u> अस्ति।

(ii) <u>लम्बोदरः</u> अत्र विराजते।

(iii) <u>अधर्मं</u> मा कुर्यात्।

(iv) श्रमिकः <u>यथाशक्तिं</u> कार्यं करोति।

***अथवा***

(i) धार्मिकः <u>परोपकारं</u> करोति।

(ii) <u>रामलक्ष्मणौ</u> वनं गतौ।

(iii) सः <u>नीलाम्बरं</u> पश्यति।

(iv) <u>त्रिभुवने</u> ईश्वरः व्याप्तः।

प्रश्न-25 अधोलिखित पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत— [1×4=4]

ज्ञाने मौनं क्षमा शक्तो त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

*प्रश्नाः*

(i) दिलीपस्य मौनं कस्मिन् आसीत् ?

(ii) दिलीपस्य शक्तौ का आसीत् ?

(iii) राज्ञः कस्मात् गुणाः सप्रसवा इव आसन् ?

(iv) 'संग्रहे' इत्यर्थे अत्र किं विलोमपदं प्रयुक्तम् ?



https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com


***अथवा***

रूपं प्रसिद्धं न बुधास्तदाहुर्विद्यावतां वस्तुत एव रूपम्।
अपेक्षया रूपवतां हि विद्या मानं लभन्तेऽतितरां जगत्याम्॥

*प्रश्ना:*

(*i*) के प्रसिद्धं रूपम् आहु: ?

(*ii*) केषाम् अपेक्षया विद्या मानं ददाति ?

(*iii*) जना: कुत्र मानं लभन्ते ?

(*iv*) 'रूपं प्रसिद्धम्' अनयो: पदयो: विशेष्यपदं किम् ?

**प्रश्न–26** अधोलिखित नाट्यांशाधारितप्रश्नान् संस्कृतभाषया उत्तरत— [1×4=4]

ततो ''दौवारिक! शान्तो भव किमिति व्यर्थं मुमूर्षुरितिबधिर इति च वदसि ?'' इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ ''तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रि: पृष्टोऽपि प्रत्युत्तरमदद् हन्तव्य: इति'' इत्येवं भाषमाणेन द्वा:स्थेन क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमान: कोऽपि काषायवासा: घृततुम्बीपात्र: भव्यमूर्ति: संन्यासी दृष्ट:।

*प्रश्ना:*

(*i*) प्रभुवर्याणां क: आदेश: ?

(*ii*) काषायवासा: क: आसीत् ?

(*iii*) 'सम्पूर्णं' इति पदस्य पर्यायपदम् अत्र किं प्रयुक्तम् ?

(*iv*) 'भव्यमूर्ति: संन्यासी' अनयो: पदयो: विशेषणपदं किम् ?

***अथवा***

(*i*) ''दौवारिकेण प्रहरिणा वा त्रि:पृष्टोऽपि प्रत्युत्तरमदद् हन्तव्य: इति'' केषां आदेश: ?

(*ii*) कीदृश: संन्यासी दृष्ट: ?

(*iii*) 'द्वारपालेन' इति पदस्य पर्यायपदम् अत्र किं प्रयुक्तम् ?

(*iv*) 'भव्यमूर्ति: संन्यासी' अनयो: पदयो: विशेष्य पदं किम् ?



https://www.cgboardonline.com
https://www.cgboardonline.com
https://www.cgboardonline.com

https://www.cgboardonline.com



प्रश्न 27 अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नान् संस्कृतभाषया उत्तरत— [1×4=4]

वत्सराजश्च धारानगरीं सम्प्राप्य राजानं प्रणिपत्योपविष्टः। राजा च सौधं निर्जनं विधाय वत्सराजं प्राह—त्वया भोजो भुवनेश्वरी विपिने रात्रौ हन्तव्यः, छिन्नं च तस्य शिरः मत्पार्श्वे अन्तःपुरम् आनेतव्यम्। एतन्निशम्य वत्सराजः उत्थाय नृपं नत्वा प्रावोचत— यद्यपि देवादेशः प्रमाणम्, पुनरपि किंचिद् वक्तुकामोऽस्मि, सापराधमपि मे वचः क्षन्तव्यम्। देव! पुत्रवधो न कदापि हिताय भवतीति।

*प्रश्नाः*

(*i*) वत्सराजः कुत्र सम्प्राप्य राजानं प्राणिपत्योपविष्टः?

(*ii*) भुवनेश्वरी विपिने कः हन्तव्यः?

(*iii*) 'दिवसे' इति पदस्य विलोमपदं किमत्र प्रयुक्तम्?

(*iv*) 'कल्याणाय' इति पदस्य पर्यायपदं किमत्र प्रयुक्तम्?

***अथवा***

(*i*) राजा वत्सराजं किमकथयत्?

(*ii*) भोजो कदा हन्तव्यः?

(*iii*) 'प्रावोचत्' इति क्रियापदस्य कर्ता कः?

(*iv*) 'वने' इति पदस्य किमत्र पर्यायपदं प्रयुक्तम्?

---

**https://www.cgboardonline.com**
**Whatsapp @ 9300930012**
**Send your old paper & get 10/-**
**अपने पुराने पेपर्स भेजे और 10 रूपये पायें,**
**Paytm or Google Pay से**

https://www.cgboardonline.com

https://www.cgboardonline.com

https://www.cgboardonline.com